श्रीगौराङ्गस्तवकल्पतरुः

गतिं दृष्ट्वा यस्य प्रमदगजवर्येऽखिलजना
मुखं च श्रीचन्द्रोपरि दधति थूत्कारनिवहम्।
स्वकान्त्या यः स्वर्णाचलमधरयच्छीधु च वच
स्तरङ्गैर्गौराङ्गो हृदय उदयन्मां मदयति ॥१॥

अलङ्कृत्यात्मानं नवविविधरत्नैरिव वल-
द्विवर्णत्वस्तम्भास्फुटवचनकम्पाश्रुपुलकैः।
हसन्स्विद्यन्नृत्यन्शितिगिरिपतेर्निर्भरमुदे
पुरः श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥२॥

रसोल्लासैस्तिर्यग्गतिभिरभितो वारिभिरलं
दृशोः सिञ्चन्लोकानरुणजलयन्त्रत्वमितयोः।
मुदा दन्तैर्दष्ट्वा मधुरमधरं कम्पचलितै
र्नटन्श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥३॥

क्वचिन्मिश्रावासे व्रजपतिसुतस्योरुविरहात्
श्लथच्छ्रीसन्धित्वाद्दधदधिकदैर्घ्यं भुजपदोः।
लुठन्भूमौ काक्वा विकलविकलं गद्गदवचा
रुदन्श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥४॥

अनुद्घाट्य द्वारत्रयमुरु च भित्तित्रयमहो
विलङ्घ्योच्चैः कालिङ्गिकसुरभिमध्ये निपतितः ।
तनूद्यत्सङ्कोचात्कमठ इव कृष्णोरुविरहा
द्विराजन्गौराङ्गो हृदय उदयन्मां मदयति ॥५॥

स्वकीयस्य प्राणार्बुदसदृशगोष्ठस्य विरहात्
प्रलापानुन्मादात्सततमति कुर्वन्विकलधीः ।
दधद्भित्तौ शश्वद्वदनविधुघर्षेण रुधिरं
क्षातोत्थं गौराङ्गो हृदय उदयन्मां मदयति ॥६ ॥

क्व मे कान्तः कृष्णस्त्वरितमिह तं लोकय सखे
त्वमेवेति द्वाराधिपमभिवदन्नुन्मद इव ।
द्रुतं गच्छ द्रष्टुं प्रियमिति तदुक्तेन धृतत
द्भुजान्तर्गौराङ्गो हृदय उदयन्मां मदयति ॥७ ॥

समीपे नीलाद्रेश्चटकगिरिराजस्य कलना
दये गोष्ठे गोवर्धनगिरिपतिं लोकितुमितः ।
व्रजन्नस्मीत्युक्त्वा प्रमद इव धावन्नवधृतो
गणैः स्वैर्गौराङ्गो हृदय उदयन्मां मदयति ॥८ ॥

अलं दोलाखेलामहसि वरतन्मण्डपतले
स्वरूपेण स्वेनापरनिजगणेनापि मिलितः ।
स्वयं कुर्वन्नाम्नामतिमधुरगानं मुरभिदः

सरङ्गो गौराङ्गो हृदय उदयन्मां मदयति ॥९॥

दयां यो गोविन्दे गरुड इव लक्ष्मीपतिरलं
पुरीदेवे भक्तिं य इव गुरुवर्ये यदुवरः।
स्वरूपे यः स्नेहं गिरिधर इव श्रीलसुबले
विधत्ते गौराङ्गो हृदय उदयन्मां मदयति ॥१०॥

महासम्पद्दावादपि पतितमुद्धृत्य कृपया
स्वरूपे यः स्वीये कुजनमपि मां न्यस्य मुदितः।
उरोगुञ्जाहारं प्रियमपि च गोवर्धनशिलां
ददौ मे गौराङ्गो हृदय उदयन्मां मदयति ॥११॥

इति श्रीगौराङ्गोद्गतविविधसद्भावकुसुम-
प्रभाभ्राजत्पद्यावलिललितशाखं सुरतरुम्।
मुहुर्योऽतिश्रद्धौषधिवरबलत्पाठसलिलै
रलं सिञ्चेद्विन्देत्सरसगुरुतल्लोकनफलम् ॥१२॥

इति श्रीमद्रघुनाथदासगोस्वामिविरचितस्तवावल्यां श्रीगौराङ्गस्तवकल्पतरुः समाप्तः।